
# ત્રયી ચિંતન

## સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

**PART - I**





✦ Publisher ✦

**PRINCIPAL**

Smt. C. P. Choksi Arts and

Shree P. L. Choksi Commerce College.

Veraval.


Scanned by CamScanner

ત્રયી ચિંતન (TRAYEE CHINTAN)
સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

© Sampaadak - Prin. Dr. R. P. Mehta

©Sahsampaadak - Dr. A. M. Chocha
- Prof. S. J. Vaghela
- Dr. N. R. Suba

(પ્રસ્તુત પુસ્તકમાં રજૂ કરેલી દરેક બાબતોની જવાબદારી જે તે લેખનકર્તાની છે.)

પ્રાપ્તિ સ્થાન : Smt. C. P. Choksi Arts and Shree P. L. Choksi Commerce College, Veraval.

ISBN No. 978-93-86103-14-7

પ્રથમ આવૃત્તિ : ૨૦૧૬

કિંમત : ૩૫૦/—

**Publisher :**
**PRINCIPAL**
Smt. C. P. Choksi Arts and
Shree P. L. Choksi Commerce College.
Veraval.

**Setting & Printing**
**Kamlesh Prakashan Mandir**
G-52, Neo Square, P.N. Marg,
Near Income Tax Office,
Jamnagar - 361008.
Contact : 9879427072 / 9824163463
E-mail : kamleshprakashan@gmail.com

Scanned by CamScanner

# ॥ शिवसंकल्पसूक्ते मनस्तत्त्वम् ॥

**डॉ. शत्रुघ्नपाणिग्राही**

**आसि.प्रोफेसर, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्**

विद्यमानं वस्तु 'सत्' इति शब्देनाख्यायते । यत्र प्राणाः स प्राणी । स एव सच्छब्दभाक् । यत्र तु प्राणाभावः स प्राणविरहितः पदार्थोऽसदेव । 'सामान्ये सामान्याभावः' इति सिद्धान्तात् प्राणे प्राणाभावः । अतश्च तदेतत् प्राणतत्त्वमसच्छब्देनाख्यायते । स एष ऋषिर्देवतामूर्तिर्यजुः प्राण आकाशात्मा ऋक्सामाभ्यां परिवेष्टितः सर्वप्रथमं सत्ताभावेन परिणतो भवति । आत्मा मनः प्राणवाङ्मयः । स एष सृष्टिसाक्षी प्रविष्ट आत्मा सगुणमूर्तिः । अन्यश्च आनन्दविज्ञानमनोमयो मुक्तिसाक्षी निर्गुणो भावः । स एष गौणरूपेणैव विश्वे प्रविष्टः सन्नपि अप्रविष्ट एव । आनन्द-विज्ञान-मनः-प्राण-वाङ्मयः पञ्चकोषात्मकोऽव्ययपुरुष एव मुक्ति साक्षिभागेन विश्वस्य अकर्ता, स एव सृष्टिसाक्षिभागेन कर्तेति साधूक्तं पुरुषोत्तमेन श्री कृष्णेन ।[1] तत्र आनन्दः मोदप्रमोदहर्षभेदभिन्नः प्रसिद्धः । विज्ञानं चिद्भावः । मनः प्राणवाचां संघातस्य सद्भावः, सत्ताभावो वा । मनो रूपाणामुक्थम् । मनस एव सर्वाणि रूपाण्युत्तिष्ठन्ते । मनस्येव च आगतानि तत्तद्विषयरूपाणि प्रतिष्ठितानि भवन्ति । अतश्च मनो रूपाणामाधारभूमिः । गोपथब्राह्मणानुसारं मनः ब्रह्मस्वरूपम् ।[2] मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ इति मैत्रायण्युपनिषद् वचनानुसारं कैवल्यप्राप्त्यर्थं मनसः स्थिरिकरणाय वेदस्य महत्त्वपूर्णं स्थानं विद्यते ।

शुक्लयजुर्वेदीयशिवसंकल्पसूक्तस्यानुशीलनेन ज्ञायते यत् सर्वासां शक्तीनां स्रोतो मन एव वर्तते । अस्य सूक्तस्य देवता मनस्तथा द्रष्टा ऋषिः याज्ञवल्क्यः । सूक्तस्य प्रारम्भे प्रथममन्त्रे मनसः ज्योतिरूपत्वं सिद्धं भवति । जाग्रदवस्थायां शयनावस्थायाञ्च यन्मनो मनुष्याणां यत् च पुनः भूत-वर्तमान-भविष्यत् कालिकान् विषयान् प्रत्यपि सहजभावेन प्रैति, तादृशं मे मनः शुभसंकल्पात्मकं भवत्युति प्रार्थना वेदेषु वर्तते ।[3] मनः शिवसंकल्पात्मकं कथं साधनीयमितिप्रसङ्गे अन्नपूर्णोपनिषदि श्रूयते यथा–

**चित्तोन्मेषनिमेषाभ्यां संसारप्रलयोदयौ । वासनाप्राणसंरोधमनुन्मेषं मनः कुरु ॥**

**प्राणोन्मेषनिमेषाभ्यां संसृतेः प्रलयोदयौ । तदभ्यासप्रयोगाभ्यामुन्मेषरहितं कुरु ॥**

**मौर्ख्योन्मेषनिमेषाभ्यां कर्मणां प्रलयोदयौ । तद्विलीनं कुरु बलाद् गुरुशास्त्रार्थसङ्गमैः ॥[4]**

संकल्पात्मिक-विकल्पात्मकमनसा धीराः मनीषिणः ज्ञाने जाते सति यज्ञकर्मणि नानाविधानि इष्टि-सोम-पशुरूपाणि यज्ञकर्माणि कुर्वन्ति । पुनश्च सर्वेभ्यः पदार्थेभ्य इन्द्रियेभ्यो वा पूर्वमुत्पन्नं सत् यज्ञकर्मकर्तुं क्षममासीत् तादृङ् मम मनः शिवसंकल्पयुक्तं भवत्युति श्रूयते ।[5] मनसः स्वरूपमुपस्थापन् श्रुतिः प्रतिपादयति यत् आत्म-ज्ञान-प्रवर्तकत्वात् मनः प्रज्ञानरूपम्[6], करणरूपम्, ज्योतिरूपमस्ति । येन विना किमपि यज्ञादिकं श्रेष्ठकर्मानुष्ठानं न संभवति ।[7] वेदः भवति यज्ञप्रधानः । यज्ञो वै श्रेष्ठतम कर्म[8] इति शतपथब्राह्मणस्य वचनम् । यज्ञकर्मणि चत्वारः ऋत्विजः भवन्ति । तेषु होता नामक ऋत्विक् ऋग्वेदीयमन्त्राणां पुष्टिं करोति । अस्मिन् प्रसङ्गे सप्तहोता इति शब्दस्य प्रयोगः दृश्यते । 'होता' नाम आह्वाता आवाहनकर्ता । अग्निष्टोमयागे सप्तहोतारो भवन्ति । तेषु ऋत्विज्जनेषु मनः स्थितं भवत्युति प्रार्थना श्रूयते ।[9] आदौ मनसि विकारभावनायाः त्याग कर्तव्या । तदर्थमन्नपूर्णोपनिषदि वर्णनं दृश्यते यथा-

**वासनारहितैरन्तरिन्द्रियैराहरन्क्रियाः । न विकारमवाप्नोषि खवत्क्षोभशतैरपि ॥[10]**

यस्मिन्विख्याते मनसि सूक्ष्मरूपेण नित्याः सर्वे ऋगादयो वेदाः तद्वदेव भासमाना दृश्यन्ते यथा रथवहनसाधनीभूते चक्रे अराः दृश्यन्तेति उपमालङ्कारदृष्ट्या सूक्तेऽस्मिन् चर्चा विहिता ।[11] शरीररूपे रथे मनसः कार्यप्रसङ्गे श्रूयते कठोपनिषदि –

Scanned by CamScanner

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।**

**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥**[१२]

"मन एव प्रजापतेः अपूर्वा तनूः" इति ऐतरेयब्राह्मणस्य वचनम् । मन एव सत्त्वगुणोपेतं चेत् तन्मोक्षसाधनं जायते । तदेव विपरीतं सत् तमोगुणोपेतं बन्धनस्य कारणम् आपद्यते । ब्रह्मबिन्दूपनिषदि मनसो द्विधा तथैव तस्योन्मनीभावः कथं सञ्जायते कथं च साधकस्यात्मानुभूतिरुपजायते तत्सर्वं स्पष्टतया वर्णितमस्ति । संकल्पमूलस्य मनसो नियन्त्रणेणैव आत्मसाक्षात्कारः, ब्रह्मज्ञानोपलब्धिः, सकलेषु च भूतेषु आत्मचैतन्यम्, शब्दब्रह्मणः परब्रह्मणश्चैकत्वबोधादिको विषयः सविस्तरं निरूप्यते । मनोनियन्त्रणार्थं मुमुक्षोः किं तावत् कर्तव्यमिति प्रसङ्गे तत्रैव श्रूयते यथा –

**यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते । तस्मान्निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥**[१३]

पुनः मनसः नियन्त्रणप्रसङ्गे मैत्रायण्युपनिषदः वचनं स्मर्यते यथा –

**लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् । यदा यात्युन्मनीभावं तदा तत् परं पदम् ॥**

**तावदेव निरोद्धव्यं हृदि यावत्क्षयं गतम् । एतद् ज्ञानं च मोक्षं च शेषाः स्युर्ग्रन्थविस्तराः ॥**[१४]

अतः यन्मनः मनुष्यान् तथैव मनोवृत्तिभिः विविधं नयति, विषयेषु भ्रामयति यथा कश्चित्कुशलः सारथिः रथवाहकानश्वान् कशाभिः अभीष्टं देशं अतिशयेन वारं वारं वा नयति । तथा च यत् वेगवत् सत्, अजिरं च सत् हृद्देशे प्रतिष्ठितं विद्यते प्राणिनाम्, तादृशं मनः यदि शिवसंकल्पयुक्तं भवेत् चेत् मनसा जुहोमि इति न्यायेन निर्मलं भूत्वा मोक्षसाधनं जायते । जीवनस्य परमं चरमं च लक्ष्यं वर्तते जीवनमुक्तिः । एतदर्थं जीवपुरुषः सततं प्रयतते । 'तेन त्यक्तेन भुञ्जीथा' इति भावनया मित्रस्य चक्षुषा समीक्षामहे इति दृष्ट्या जीवपुरुषः मनसः स्थिरीकरणाय शुक्लयजुर्वेदीय शिवसंकल्पसूक्तस्य अन्वेषणम् अवश्यमेव करणीयम् ।

---

१. तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्, गीता-४/१३

२. मनो वै ब्रह्म, गोपथब्राह्मणम्, १/२/४

३. यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति । दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु । – शुक्लयजुर्वेदः-३४/१
यद्देवा देवान् हविषा यजन्तमर्त्यान् मनसा मर्त्येन ।
मदेम तत्र परमे व्योमन पश्येम तदुदितौ सूर्यस्य ॥ – अथर्ववेदः-७/५/३

४. अन्नपूर्णोपनिषद्-४०-४२

५. येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥ – शुक्लयजुर्वेद-३४/२

६. प्रज्ञानं ब्रह्म-ऐतरेयोपनिषद्-पञ्चमः खण्डः

७. यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योयोतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किं च न कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥ – शुक्लयजुर्वेद-३४/३

८. शतपथब्राह्मणम्-१/१/१/२

९. येनदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥ – शुक्लयजुर्वेदः-३४/४

१०. अन्नपूर्णोपनिषद्-३९

११. यस्मिन्नृचः साम यजू ऽषि यस्मिन्प्रतिष्ठिता रथना भाविवाराः ।
यस्मिंश्चित्तऽ सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥ – शुक्लयजुर्वेदः-३४/५

१२. कठोपनिषद-अ.१-वल्ली-३

१३. ब्रह्मविन्दूपनिषद्-३

१४. मैत्रायण्युपनिषद्-७-८



Scanned by CamScanner